# पिता सुता च
## Father and Daughter[1]
## (A Poem on Sakuntala and Visvamitra)

### I

"प्रणन्तुमाचार्यवर्यान् ज्ञात्वा कालं च सम्मतिम्।
प्रत्यागच्छ मुदा वत्स! शुनःशेफ! ततोऽवधिः॥ १॥
अशोकवृक्षच्छायायां तिष्ठाम्यत्रे" ति सुन्दरम्।
भेरीमन्द्रस्निग्धसूक्तम् उदियाय पुरैकदा॥ २॥
अपराह्णातपस्पर्शात् तप्तस्वर्णप्रवाहवत्।
जाज्ज्वल्यमानस्य हेमकूटशैलस्य पार्श्वतः॥ ३॥
कश्यपर्ष्याश्रमारण्ये क्वचिन्निःशब्दतां पराम्।
अपराह्णे विद्यमानां भङ्क्त्वा तत्र यदृच्छया॥ ४॥ कलापकम्॥

"आचार्यवर्यान् प्रणन्तुं कालं सम्मतिं च ज्ञात्वा (हे) वत्स, शुनःशेफ, मुदा प्रत्यागच्छ। ततोऽवधिः अत्र अशोकवृक्षच्छायायाम् (अहं) तिष्ठामि" इति सुन्दरं भेरीमन्द्रस्निग्धसूक्तम् अपराह्णातपस्पर्शात् तप्तस्वर्णप्रवाहवत् जाज्ज्वल्यमानस्य हेमकूटशैलस्य पार्श्वतः तत्र कश्यपर्ष्याश्रमारण्ये क्वचित् अपराह्णे विद्यमानां परां निःशब्दतां भङ्क्त्वा यदृच्छया पुरा एकदा उदियाय।

Dear *shunaHshepha*, please come back happily, after knowing the time and having permission to salute the great preceptor. Till then, I shall stand here in the shade of this ashoka tree - Once upon a time, these beautiful words arose somewhere in the premises of the hermitage of the sage *kashyapa*, situated in the valley of the mountain *hemakuuTa* which was brilliant like the flow of melted gold due to the touch of the sunshine in the afternoon. The words were low and tender like the sounds of a kettle-drum and arose suddenly breaking the utmost silence used to be there in the afternoon.

प्रियं स्वशिष्यं संप्रेष्याऽनतं तस्मिन् तपस्विनि।
अतिथौ वञ्जुळच्छायां प्राप्ते सति, "पितामहम्॥ ५॥
दर्शयिष्याम्यहं चे" ति वचसा मधुवर्षिणा।
समीपमागतस्तस्य बालकः कश्चिदञ्जसा॥ ६॥ युग्मकम्॥

आनतं प्रियं स्वशिष्यं संप्रेष्य अतिथौ तस्मिन् तपस्विनि वञ्जुळच्छायां प्राप्ते सतिः "अहं च पितामहं दर्शयिष्यामि" इति मधुवर्षिणा वचसा कश्चित् बालकः अञ्जसा तस्य समीपम् आगतः (आसीत्)।

After sending his dear disciple, who bowed to him, when the guest sage went to the shade of the ashoka tree, a child approached him saying these sweet (honey-flowing) words: “I shall show you my grandfather.”

[1] Orginal poem in Malayalam by Vallathol Narayana Menon. Translated into Sanskrit by N.V.P.Unithiri, Prof. of Sanskrit, University of Calicut, Kerala.

कोऽयं किशोररत्नं तं भगवन्तं तु कश्यपम्।
पितामहं चाह्वयितुं जयन्तो वेति संशयः॥ ७॥

कः अयं किशोररत्नं - भगवन्तं तं कश्यपं पितामहं च आह्वयितुं? (अयं) जयन्तः वा इति संशयः।

Who is this gem of a child to call the lord *kashyapa* as grandfather? I doubt that he may be *Jayanta* (son of god *Indra*, who is the son of *kashyapa*).

न चैव स, महेन्द्रस्य सूनुरस्माद्वयोऽधिकः।
दृश्यते च किशोरेऽस्मिन् प्रभावो मानवीयकः॥ ८॥

स न एव च। महेन्द्रस्य सूनुः अस्माद वयोऽधिकः (भवति)। अस्मिन् किशोरे मानवीयकः प्रभावः दृश्यते च।

(This child) is not he (*Jayanta*). The god *Indra*'s son is elder than this boy. Moreover, human lustre can be seen in him.

न कोऽयमित्येवान्वेष्टुमैच्छत् सोऽयमृषीश्वरः।
किन्तु वक्षसि विन्यस्य द्रुतमाश्ळेष्टुमेव तम्॥ ९॥

सः अयं ऋषीश्वरः कः अयम् इति अन्वेष्टुं न ऐच्छद एव। किन्तु द्रुतं तं वक्षसि विन्यस्य आश्ळेष्टुम् एव (ऐच्छत)।

The great seer did not wish to enquire who he was. On the other hand, he wanted to take him on his breast and embrace him.

साहसी बालकोऽसौ तं विमुक्तं पुनरप्यहो।
ऐहिकेष्वतिवेगेन कृष्ट्वा चापातयद् बलात्॥ १०॥

साहसी असौ बालकः विमुक्तं तं पुनरपि बलात् अतिवेगेन कृष्ट्वा ऐहिकेषु अपातयत्।

Drawing the liberated (sage) fast, once again the impetuous boy pushed him into the worldly affairs.

आनम्याकृष्य वत्सं तमुवाह सुकृती मुनिः।
बृहद्भ्यामथ बाहुभ्यां सदयं त्वालिलिङ्ग च॥ ११॥

सुकृती मुनिः आनम्य तं वत्सम आकृष्य बृहद्भ्यां बाहुभ्याम् उवाह। अथ सदयम् आलिलिङ्ग च।

The sage, who has to his credit many virtues, bent and took the lovely boy with his huge hands. And then he embraced him.

स शिशुर्विललासोरस्यस्य कृष्णाजिनाञ्चिते ।
सितेतरे महाकाशे ह्यार्द्रा सा तारका यथा॥ १२॥

सः शिशुः अस्य कृष्णाजिनाञ्चिते उरसि, यथा आर्द्रा सा तारका सितेतरे महाकाशे (तथा), विललास।

That boy shined on his breast that is beautiful with the antelope-skin, just like the *aardraa* star in the dark and wide sky.

अंसान्तं लम्बमानं लीलायासस्वेदपङ्किलम्।
उत्सार्य हस्तेनैकेन मृदु तच्चूर्णकुन्तळम्॥ १३॥
सावधानं शिशोस्तस्य गण्डपुष्पे निवेशयन्।
तिष्ठति स्म सुधन्योऽयं श्मश्रुलम्बि निजाननम्॥ १४॥ युग्मकम्॥

अयं सुधन्यः लीलायासस्वेदपङ्किलम् अंसान्तं लम्बमानं मृदु तच्चूर्णकुन्तळम् एकेन हस्तेन सावधानम् उत्सार्य श्मश्रुलम्बि निजाननं (तस्य) शिशोः गण्डपुष्पे निवेशयन् तिष्ठति स्म।

The extremely fortunate one, the sage, carefully removing the boy's soft curl - which was hanging down to his shoulder and which was mud-smeared due to the sweat by exertion of play- to a side with his one hand, and placing his face on his flower-like cheek, stood there.

परस्परं च सम्मिळ्य रेजाते नेत्ररञ्जकम्।
क्षात्रतेजोऽङ्कुरो ब्राह्मतेजःसारश्च साम्प्रतम्॥ १५॥

क्षात्रतेजोऽङ्कुरः ब्राह्मतेजस्सारः च परस्परं साम्प्रतं सम्मिळ्य नेत्ररञ्जकं रेजाते।

The sprout of the valour of the *kShatriya* and the essence of the prowess of the *braahmaNa* combined each other properly (in him) and shined attracting the eyes (of everybody).

शिश्ये निःशङ्कमपरिचितस्यांसे किशोरकः।
अज्ञायमानात् सुदृढात् कुतश्चिद् बान्धवादिव॥ १६॥

किशोरकः अपरिचितस्य अंसेः अज्ञायमानात् सुदृढात् कुतश्चित् बान्धवात् इव, निःशङ्कं शिश्ये।

The boy lied on the shoulder of the stranger without any hesitation, as if (they shared) some unknown but intimate relationship.

पितामहादथान्यस्माल्लाळनं ह्यनुभूयते।
इतीव तस्य हृष्टस्य प्रतिभाति स्म किं तदा॥ १७॥

अथ हृष्टस्य तस्य तदा अन्यस्मात् पितामहात् लाळनम् अनुभूयते इति इव किं प्रतिभाति स्म।

Now, is it that the joyful boy felt as if he was enjoying the caress from another grandfather?

अथवा बालकानां किमस्ति स्वपरभिन्नतात्त क।
मृदोः करस्य सर्वस्य साध्यं कुसुमलाळनम्॥ १८॥

अथवा बालकानां किं स्वपरभिन्नता अस्ति? सर्वस्य मृदोः करस्य कुसुमलाळनं साध्यम्।

Or, to the children, is there any difference between 'mine' and 'yours'? Every soft hand can caress the flowers.

पृच्छामि सादरमहं महर्षे भवतः किमु।
समास्वाद्यं समधिकमेतयोरुभयोरपि॥ १९॥
महान् स सच्चिदानन्दो ध्यानसम्मिळनोद्भवः।
आनन्द एतन्मृदुलशरीरालिङ्गनोद्भवः॥ २०॥ युग्मकम्॥

महर्षेः अहं सादरं पृच्छामि - एतयोः उभयोः अपि भवतः समधिकं समास्वाद्यं किमु - ध्यानसम्मिळनोद्भवः स महान् सच्चिदानन्दः, एतन्मृदुलशरीरालिङ्गनोद्भवः आनन्दः?

Oh great sage, let me ask respectfully; between the following two, which is more enjoyable to you: that great bliss that emanates from the meditational experience or the happiness that comes out of this embrace with the soft body (of this child)?

मीलिताक्षोऽभवद् बालसंश्ळेषसुखतो मुनिः।
बालस्तु किञ्चिद्दूरस्थचक्षुरुच्चैर्हसन्नसौ॥ २१॥
मातरस्म्यहमत्रैवेत्याह, तन्मोहनं वचः।
श्रुत्वा तत्रागता तन्वी काचिद् द्रुततरं परम्॥ २२॥ युग्मकम्॥

मुनिः बालसंश्ळेषसुखतः मीलिताक्षः अभवत्। असौ बालः तु किञ्चिद्दूरस्थचक्षुः उच्चैः हसन्"मातः, अहम् अत्र एव अस्मि" इति आह। तत् मोहनं वचः श्रुत्वा काचित् तन्वी तत्र परं द्रुततरम् आगता (आसीत्)।

The sage had closed his eyes, satisfied due to the embrace of the boy. The boy, however, eyeing at a distance and laughing loudly, said: "Oh my mother, I am right here." On hearing the lovely words, a lady came there quickly.

मलिनं वसनं धृत्वा तरुणी सैकवेणिका।
कृशा लावण्यैकभूषा दुःखमूर्तिरिवाबभौ॥ २३॥

मलिनं वसनं धृत्वा एकवणिका कृशा लावण्यैकभूषा सा तरुणी दुःखमूर्तिः इव आबभौ।

In dirty clothes, having just a single braid of hair (as a sign of mourning due to the separation from her husband ), thin, having her beauty alone as the ornament, that youthful lady shone like an embodiment of sadness.

स्निग्धेन नयनेनास्या दर्शने स्यान्मुनेर्मुखम् ।
प्रष्टुकामं,"मेनके! ते किमिदं परिवर्तनम्"॥ २४ ॥

स्निग्धेन नयनेन अस्याः दर्शने मुनेः मुखम् (एवं) प्रष्टुकामं स्यात्ः "मेनके! ते किम् इदं परिवर्तनम्?" ।

On seeing her with his affectionate eyes, the sage's mouth might have wished to ask: "Oh *Menaka*, why is this change in you?"

किन्तु पप्रच्छैवमेव-"का त्वं वत्से! वद द्रुतम् ।
स्फुटसम्राड्लक्षणस्य बालस्यास्य प्रियाम्बिका?" ॥ २५ ॥

किन्तु (सः) एवमेव पप्रच्छ-"वत्से, स्फुटसम्राड्लक्षणस्य अस्य बालस्य प्रियाम्बिका त्वं का? द्रुतं वद ।"

But, he asked only this much: "Dear, who are you, the mother of this boy, who has clear symbols of an emperor?"

तदन्तरे सुतोऽयं तु, "हा! हा! वर्णमनोहरः ।
मार्कण्डेयगतो मृन्मयूरोऽसा"विति संब्रुवन्॥ २६ ॥
ब्रह्मर्षिवक्षसः प्लुत्वा ग्रहणान्मातुरञ्जसा ।
विमुच्य चटुलं धीरं धावति स्म विदूरतः॥ २७ ॥ युग्मकम्॥

तदन्तरे अयं सुतः तु, "हा! हा! वर्णमनोहरः असौ मृन्मयूरः मार्कण्डेयगतः "इति संब्रुवन्, ब्रह्मर्षिवक्षसः प्लुत्वा मातुः ग्रहणात् विमुच्य अञ्जसा चटुलं धीरं विदूरतः धावति स्म ।

Meanwhile, this boy, saying "ah, that painted clay-peacock is with *maarkaNDeya*", after jumping out of the *braahmaNa*- sage's breast, and freed from the grasp of his mother, ran far away, shaking and energetic.

**II**

वत्सस्य धावनं दृष्ट्वा दीर्घं निःश्वस्य च स्वयम्।
नियम्य कथमप्यश्रूण्यानतास्या कृताञ्जलिः॥ २८॥
भक्त्या ततोऽधिकस्नेहादात्मवृत्तान्तमादरात्।
निवेदयामास तत्र सच्चरित्रा महर्षये॥ २९॥ युग्मकम्॥

वत्सस्य धावनं दृष्ट्वा स्वयं दीर्घं निःश्वस्य च कथमपि अश्रूणि नियम्य आनतास्या सच्चरित्रा (सा) कृताञ्जलिः भक्त्या ततः अधिकस्नेहात् आदरात् तत्र महर्षये आत्मवृत्तान्तं निवेदयामास।

Having seen her child's running, sighing heavily, controlling tears somehow, she who has good character, with her face bent down, with folded hands, submitted there to the great sage her own story with devotion, more than that, with love and respect.

"मुक्तात्मन्, जन्मतश्चैव त्यक्ताहं पितृभिर्वने।
धृत्वा कण्वर्षिणाथ प्रपुष्टा वात्सल्यपूर्वकम्॥ ३०॥
ततो दुष्यन्तराजेन गान्धर्वेण विवाहिता।
जनको मम विख्यातो विश्वामित्रमहामुनिः"॥ ३१॥ युग्मकम्॥

"(हे) मुक्तात्मन्, जन्मतः च एव पितृभिः वने त्यक्ता अहम् अथ कण्वर्षिणा धृत्वा वात्सल्यपूर्वकं प्रपुष्टा ततः दुष्यन्तराजेन गान्धर्वेण विवाहिता (अस्मि)। मम जनकः विख्यातः विश्वामित्रमहामुनिः (भवति)"।

"Oh one having the liberated soul, at the time of the birth itself, I was left alone in the forest by my parents, and then was taken and well looked after by sage *kaNva*, then married by way of *gaandharva* by king *duShyanta*. My father is the famous great sage *vishvaamitra*."

"किमहं?" विस्मितोऽभूत् स तापस"स्ते पिता खलु।
मुनिपुत्रि! त्वया साकमिदानीं प्रवदन्नहम्॥ ३२॥

"किम् अहम्?" -सः तापसः विस्मितः अभूत्। (ततः स आह) - (हे) मुनिपुत्रि! त्वया साकम् इदानीं प्रवदन् अहं ते पिता खलु।

"What, me?" - The sage wondered. (Then he said)- Oh the sage's daughter! I myself, who is now talking with you, am your father.

स्मरामि हा! जनित्री ते मेनके" ति; जलोदयः।
तीर्णक्लेशस्यापि तस्य नेत्रयोरभवद् द्वयोः॥ ३३॥

हा! (अहं) स्मरामि। ते जनित्री मेनका" इति। तीर्णक्लेशस्य अपि तस्य द्वयोः नेत्रयोः जलोदयः अभवत्।

Ah, I remember your mother, *menakaa*. Even his- who had already crossed over the worldly pains- eyes watered.

उक्त्वा चा"नुगृहीताहमद्य मे तातदर्शनात्" ।
इत्यानन्दाकुलं पुत्रीं प्रणतां पादयोरिमाम्॥ ३४॥
वत्सल्येन गृहीत्वा तत्पाणिं प्रोत्थाप्य सत्वरम्।
चुचुम्ब बहुशो मूर्ध्नि गाढं स मुनिपुङ्गवः॥ ३५॥ युग्मकम्॥

"अद्य मे तातदर्शनात् अहम् अनुगृहीता" इति उक्त्वा च आनन्दाकुलं पादयोः प्रणताम् इमां पुत्रीं वात्सल्येन तत्पाणिं गृहीत्वा सत्वरं प्रोत्थाप्य सः मुनिपुङ्गवः (तस्याः) मूर्ध्नि बहुशः गाढं चुचुम्ब।

"Today I am blessed seeing my father" - saying this, she prostrated at his feet with much happiness. Then the great sage soon took his daughter's hands, made her get up and kissed on her head many times.

ततो दक्षिणहस्तेन तस्या नेत्राश्रु मार्जयन्।
परामृशंश्च तद्देहे मन्दमन्येन बाहुना॥ ३६॥
जामातुर्भूमिपालस्य क्षेमं चाप्यन्वियेष सः।
अपत्यवात्सल्य! महावशी च वशगश्च ते॥ ३७॥ युग्मकम्॥

ततः सः दक्षिणहस्तेन तस्याः नेत्राश्रु मार्जयन् अन्येन बाहुना तद्देहे मन्दं परामृशन् च जामातुः भूमिपालस्य क्षेमं च अपि अन्वियेष। (हे) अपत्यवात्सल्य! महावशी च ते वशगः च।

Then he, having wiped out her tears with his right hand, and touching her smoothly with his other hand, enquired about his (king) son-in-law's welfare. Oh affection towards one's child! even the great one, who controlled one's own senses is under your control!

"वत्से! किं ते नाम, वत्सस्यापि नाम वदाशु माम्।
भूमीशमहिषी किं त्वमागतासीर्वनं त्विदम्"॥ ३८॥

"वत्से! ते नाम किम्? वत्सस्य नाम अपि (किम्)? आशु मां वद। भूमीशमहिषी त्वं तु किम् इदं वनम् आगता आसीः?"

"Dear! What is your name? What is this nice boy's name? Tell me fast. Why did you, who is the wife of a king, come to this forest?"

भूयः स्खलद्गतित्वेन परिनिर्गळितः क्षणात्।
वीणाक्वाणः कश्चिदस्याः कम्बुकण्ठ्याश्च कण्ठतः॥ ३९॥

क्षणात् अस्याः कम्बुकण्ठ्याः कण्ठतः स्खलद्गतित्वेन कश्चित् वीणाक्वाणः भूयः परिनिर्गळितः (अभूत)।

Soon, the stumbling sound of (the Indian) lute, again, came out of this lady, whose neck is just like a conch.

"शकुन्तळेति मे तातकण्वो नामाकरोत् तदा।
दौहित्रस्ते सर्वदमनाभिधां धारितोऽप्यसौ॥ ४०॥

"तदा तातकण्वः मे शकुन्तळा इति नाम अकरोत्। असौ ते दौहित्रः सर्वदमनाभिधां धारितः अपि।

"Then sage *kaNva* gave me the name *shakuntaLaa.* And, this grandson of yours was given the name *sarvadamana.*

जनन्यनुग्रहादासीदेष दिव्याश्रमः किल।
अतिदुःखाकुलाया मे सूतिकावसथायितः॥ ४१॥

अतिदुःखाकुलायाः मे जनन्यनुग्रहात् एष दिव्याश्रमः सूतिकावसथायितः (अभवत्) किल।

By the blessings of my mother, who was extremely sad, this divine hermitage became the lying-in-chamber for me.

आश्रमादनुमोदेन तातकण्वेन धीमता।
प्रेषिता गर्भिणी चाहं राजधानीं समागता"॥ ४२॥

धीमता तातकण्वेन आश्रमात् अनुमोदेन प्रेषिता गर्भिणी अहं राजधानीं च समागता"।

I, who was pregnant, being sent by the intelligent sage *kaNva* from his hermitage with congratulations, came to the capital (of my husband, king *duShyanta*)."

इत्युक्ता दुःसहाद् दुःखात् क्षणमाक्रन्दति स्म सा।
पुनराह - "परित्यक्ता भर्त्रा सौम्येन खल्वहम्"॥ ४३॥

इति उक्त्वा सा दुःसहात् दुःखात् क्षणम् आक्रन्दति स्म। पुनः (सा) आह - "अहं सौम्येन भर्त्रा परित्यक्ता खलु"।

Telling this, she, out of unbearable anguish, cried for a moment. Then, she said: "I was abandoned by my soft-hearted husband."

अभूद् विभिन्नभावोऽयं कालरुद्राकृतिः क्षणात्।
बहिर्निर्गळितो वह्निस्फुलिङ्गोऽक्ष्णः पुनः पुनः॥ ४४॥

क्षणात् अयं कालरुद्राकृतिः विभिन्नभावः अभूत्। (अस्य) अक्ष्णः पुनः पुनः वह्निस्फुलिङ्गः बहिः निर्गळितः।

All of a sudden, he having the form of *kaalarudra* changed his temper. From his eyes, sparks of fire came out again and again.

वक्रीभूतो निटालः स वक्रिते ते भ्रुवौ तथा।
न चचालात्र पत्रं सर्वत्र निर्वातमूकता॥ ४५॥

सः निटालः वक्रीभूतः। तथा ते भ्रुवौ वक्रिते। अत्र पत्रं न चचाल। सर्वत्र निर्वातमूकता (आसीत्)।

Curves appeared on that forehead. Those eyebrows too were curved. No leaf moved. Everywhere there was silence due to the absence of wind.

"दुष्यन्तः कोऽयमेतां मे पुत्रीं हित्वा सुदुःसहे।
अवमाने स्वयं जीवन्नेव तिष्ठत्यहो! सुखम्॥ ४६॥

"कः अयं दुष्यन्तः (यः) एतां मे पुत्रीं सुदुःसहे अवमाने हित्वा स्वयं जीवन् एव सुखं तिष्ठति, अहो!

“Who is that *duShyanta*, who had thrown away this (my) daughter into disgrace and himself stands well with his life!

करोऽयमेक एवालं क्षणार्धार्धेन मानुषम्।
स्वर्गमारोपितुं पातयितुं दुर्नरके तथा॥ ४७॥

क्षणार्धार्धेन मानुषं स्वर्गम् आरोपितुं तथा दुर्नरके पातयितुम् अयम् एकः एव करः अलम्।

This hand alone can make a man ascend the heaven and, like that, throw (him) down into the hell within seconds.

श्रुतः किं वा पौरवेण विश्वामित्रप्रभावजः।
त्रिशङ्कोश्च हरिश्चन्द्रस्योपलम्भो यथार्थतः॥ ४८॥

पौरवेण विश्वामित्रप्रभावजः त्रिशङ्कोः हरिश्चन्द्रस्य च उपलम्भः यथार्थतः श्रुतः वा किम्?

Did not *Paurava* (*duShyanta*) hear about the experiences of *trishÑku* and *harishchandra* in their real sense which were due to the prowess of *vishvaamitra*?

निरीक्षतां पुनश्चापि लोकः सर्वो यथाविधि।
विश्वामित्रतपोजन्यप्रतापातिशयं द्रुतम्॥ ४९॥

सर्वः लोकः पुनः च अपि विश्वामित्रतपोजन्यप्रतापातिशयं द्रुतं यथाविधि निरीक्षताम्।

Again let the whole world see well the abundant prowess that emerged from the penance of *vishvaamitra* soon.

एकान्ते परिणीयाथ गर्भिणीमकळङ्किताम्।
निर्दयं निर्हेतुकं च त्यक्तवन! हे दुरात्मक!"॥ ५०॥

एकान्ते परिणीय अथ गर्भिणीम् अकळङ्कितां निर्दयं निर्हेतुकं च त्यक्तवन! हे दुरात्मक!"

Oh the one having an evil soul, who married secretly and then gave her up cruelly and without any reason, she being pregnant and unstained.”

ब्रह्माणं स्वतपःशक्त्या ह्यानीयास्थाय चान्तिके।
ब्रह्मर्षिपदवीं यो वै स्वायत्तीकृतवान् बलात्॥ ५१॥
दक्षिणं तं करं वेगान्मुष्टीकृत्य स्ववक्षसि।
निधायैवं प्रब्रवीतुं प्रारेभे कौशिकः क्रुधा॥ ५२॥ युग्मकम्॥

स्वतपःशक्त्या ब्रह्माणम् आनीय अन्तिके आस्थाय च यः बलात् ब्रह्मर्षिपदवीं स्वायत्तीकृतवान् तं दक्षिणं करं वेगात् मुष्टीकृत्य स्ववक्षसि निधाय कौशिकः क्रुधा एवं प्रब्रवीतुं प्रारेभे।

An angry *vishvaamitra*, all of a sudden, placing on his breast his right hand in the form of a fist, began to utter the following - it is his right hand that brought him the status of *brahmarShi* by force bringing the *brahmaa* before him by the power of his penance.

मुष्टिः सा पुरतः क्षिप्ता यदि चेत्तन्नशीकृतम्।
सर्वं स्यात् स्वामिवंशस्याप्यशनिः सा भवेदिति॥ ५३॥
शापास्त्रं तदुभाभ्यां स्वपाणिभ्यां परिगृह्य सा।
"स्मृत्वेमां क्षन्तुमेवार्हस्यत्र ताते" ति चाब्रवीत्॥ ५४॥ युग्मकम्॥

यदि सा मुष्टिः पुरतः क्षिप्ता चेत् तत् सर्वं नशीकृतं स्यात्। सा स्वामिवंशस्य अशनिः भवेत् इति (मत्वा) तत् शापास्त्रम् उभाभ्यां स्वपाणिभ्यां परिगृह्य साः "(हे) तात, इमां स्मृत्वा (त्वम) अत्र क्षन्तुम् अर्हसि एव" इति अब्रवीत् च।

In case that fist is thrown into the front, then all might be destroyed. It may be the flash of lightning to her husband's dynasty too - thinking this way, catching on that missile of curse by both her hands, she said: "Keeping my position in your mind, you please forebear in this case!"

"मा भूदिह भवत्पुत्री कदाचिद् भर्तृनाशिनी।
न निर्दग्धा भवेदुग्रवैधव्यज्वलनेन च॥ ५५॥

"इह भवत्पुत्री कदाचिद् भर्तृनाशिनी मा भूत्। उग्रवैधव्यज्वलनेन निर्दग्धा न भवेत् च।

"Here your daughter (I) should never be the one who destroys her husband. And, (she) may not be burnt in the fire of horrible widowhood.

मातापितृभ्यां प्रथमं त्यक्तां निर्भाग्यजातकाम्।
स्वच्छन्दं परितत्याज भर्तापीत्येव चिन्त्यताम्॥ ५६॥

प्रथमं मातापितृभ्यां त्यक्तां निर्भाग्यजातकां भर्ता अपि स्वच्छन्दं परितत्याज इति एव चिन्त्यताम्।

Kindly you think that the husband also, on his wish, gave her up, who was born unfortunate and was deserted first by her parents.

जीवितं मे भवत्वेव सदापि सुबहिष्कृतम्।
सुतोऽपि मम दोषेण न बहिष्क्रियतां पुनः"॥ ५७॥

सदा अपि मे जीवितं सुबहिष्कृतं भवतु एव। पुनः, मम दोषेण सुतः अपि न बहिष्क्रियताम्।"

Always my life may get expelled. But, not that of my son too, due to my fault."

पुत्र्या नेत्राश्रुभिः क्रोधलोहिताश्वे प्रशाम्यति।
सुप्रसन्नमना भूत्वा चाभिनन्दन् पिताऽब्रवीत्॥ ५८॥

पुत्र्याः नेत्राश्रुभिः क्रोधलोहिताश्वे प्रशाम्यति (सति) पिता सुप्रसन्नमनाः भूत्वा (ताम्) अभिनन्दन् च (एवम्) अब्रवीत्।

(Thus) when his fire-like anger was extinguished by his daughter's tears, the father, having a calm mind, congratulated her and said (as follows).

"भद्रं ते, तव सौशील्येनैव हा! रक्षितोऽस्म्यहम्।
सपुत्रा भव संयुक्ता प्रियभर्त्रा सहाचिरात्"॥ ५९॥

"भद्रं ते (भवतु)। हा! तव सौशील्येन एव अहं रक्षितः अस्मि। अचिरात् सपुत्रा (त्वं) प्रियभर्त्रा सह संयुक्ता भव"।

"Be blessed! Alas! I am saved by your excellent character alone. Be with your dear husband along with your son soon."

Original poem in Malayalam by Vallathol Narayana Menon (1878 - 1958), popularly known as Mahakavi Vallathol. He was one of the foremost poets of the modern period. He authored about fifty books in Malayalam. His major works include the translations of *Rigveda* and *Valmikiramayana.* His '*Acchanum Makalum*' (Father and Daughter) fills up an imagined gap in Kalidasa's *Saakuntalam.* '*Pitaa Sutaa cha*' is its Sanskrit version. N.V.P.Unithiri (b.1945), presently Professor and Head of the Department of Sanskrit, University of Calicut, Kerala, has to his credit more than twenty works in Malayalam and Sanskrit. He has also written several research papers in various journals. Besides '*pitaa sutaa cha*', he has translated some other Malayalam poems also, including O.N.V.'s '*Ujjayini*'.